128
4

अथ
"भामती"। Bhamati

वाचस्पति मिश्र प्रणीता।

वेदांतवाचस्पती ३७

राम श्रीगणेशाय नमः॥ श्रीमद्दिव्यलक्ष्मीनृसिंहाय नमः॥ श्रीवागीश्वर्यै नमः॥ ॐ अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्त्ता
यस्यैते वियदनिलतेजोऽवनयः॥ यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामः स्तद्ब्रह्मापरिमितसुखज्ञानममृतं॥१॥
निःश्वसितमस्य वेदा वीक्षितमेतस्य पंचभूतानि॥ स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः॥२॥ षाड्गुरंगैरुपेताय
विविधैरव्ययैरपि॥ शाश्वताय नमस्कुर्मो वेदाय च भवाय च॥३॥ मार्त्तंडतिलकस्वामिमहागणपतीन्वयं॥ विश्ववंद्या
न्नमस्यामः सर्वसिद्धिविधायिनः॥४॥ ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे॥ ज्ञानशक्त्यवताराय नमो भगवतो
हरेः॥५॥ नत्वा विशुद्धविज्ञानं शंकरं करुणाकरं॥ भाष्यं प्रसन्नगंभीरं तत्प्रणीतं विभज्यते॥६॥ आचार्यकृतिनिवेश
नमप्यवधूतं वचोऽस्मदादीनां॥ रथ्योदकमिव गंगाप्रवाहपातः पवित्रयति॥७॥ ॥अथ यदसंदिग्धमप्रयोजनं च
श्री॥१॥ न तत्प्रेक्षावत्प्रतिपित्सागोचरः यथा समनस्केंद्रियसन्निकृष्टः स्फीतालोकमध्यवर्त्ती घटः करटदंता वा। तथा चेदं ब्र
ह्मेति व्यापकविरुद्धोपलब्धिः। तथा हि। बृहत्वाद् बृंहणत्वाद्वा आत्मा ब्रह्मेति गीयते। स चायमाकीटपतंगेभ्यः आ च देव ॥२॥
र्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो विवेकेनाहमिति असंदिग्धाऽविपर्यस्तापरो
क्षानुभवसिद्ध इति न जिज्ञास्यदं। न हि जातु कश्चित्संदिग्धे अहं वा नाहं वेति न च विपर्यस्यति नाहमेवेति। न चाहं
कृशः स्थूलो गच्छामीत्यादि देहधर्मसामानाधिकरण्यदर्शनाद्देहालंबनोऽयमहंकार इति सांप्रतं। तदालंबनत्वे हि
योऽहं बाल्ये पितरावन्वभूवं स एव स्थविरे प्रणप्तॄननुभवामीति प्रतिसंधानं न भवेत्। न हि बालस्थविरशरीरयोरस्ति

मनागपिप्रत्यभिज्ञानगोचरेणैकत्वमध्यवसीयेत।तस्माद्येषुव्यावर्त्तमानेषुयदनुवर्त्ततेतत्तेभ्योभिन्नंयथाकुसुमे
भ्यःसूत्रं।तथाचबाल्यादिशरीरेषुव्यावर्त्तमानेष्वपिपरस्परमहंकारास्पदमनुवर्त्तमानंतेभ्योभिद्यते।अपिचस्व
प्नेदिव्यंशरीरमास्थायतदुचितभोगान्भुंजानएवप्रतिबुद्धोमनुष्यशरीरमात्मानंपश्यन्नाहंदेवोमनुष्यएवेति
देवशरीरेबाध्यमानेपिअहमास्पदमबाध्यमानंशरीराद्भिन्नंप्रतिपद्यते।अपिचयोगव्याघ्रशरीरभेदेप्यात्मानमभि
न्नमनुभवतीतिनाहंकारालंबनंदेहः।अतएवनेन्द्रियाण्यपियस्यालंबनानींद्रियभेदेपियोहमद्राक्षंसएवेदानींस्पृशा
मीत्यहमालंबनस्यप्रत्यभिज्ञानान्नापिविषयेभ्यःस्वत्वस्यविवेकःस्फुटीयानेव।बुद्धिमनसोश्चकरणयोरहमिति
कर्तृप्रतिभासस्यव्यालंबनत्वायोगः।कर्त्ताहंबोद्धाहमित्यादयस्तुप्रयोगाअसत्यपिभेदेकथंचिन्नीयाःक्रोश
तीत्यादिवदौपचारिकाइतियुक्तमुत्पश्यामः।तस्मादहंकारास्पदंदेहेन्द्रियमनोबुद्धिविषयेभ्योव्यावृत्तःस्फु
टतरोहमनुभवगम्यआत्मातस्यज्ञानाभावादजिज्ञास्यइतिसिद्धं॥अप्रयोजनत्वाच्च।तथाहि।संसारनिवृत्तिरपवर्गो
हिप्रयोजनंविवक्षितंसंसारश्चात्मयाथात्म्याननुभवनिमित्तःआत्मयाथात्म्यज्ञानेननिवर्त्तनीयः।सचेदयमनादिरना
दिनात्मयाथात्म्यज्ञानेनसहानुवर्त्ततेकुतोस्यनिवृत्तिः।अविरोधात्।कुतश्चात्मयाथात्म्याननुभवः।नह्यहमित्यनुभ
वादन्यदात्मयाथात्म्यज्ञानमस्ति।नचाहमितिसर्वजनानांस्फुटतरानुभवसमर्पितः।आत्मादेहेन्द्रियादिव्यतिरिक्तःशा
क्योपनिषद्भिरहस्यैरपिजन्यायितुमनुभवविरोधात्।नह्यागमाःसहस्रमपिघटंपटयितुमीशते।तस्मादनुभववि

राम श्रीगणेशाय नमः॥ श्रीमद्दिव्यलक्ष्मीनृसिंहाय नमः॥ श्रीवागीश्वर्यै नमः॥ ॐ अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्त्ता
यस्यैते वियदनिलतेजोऽबवनयः॥ यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतं॥१॥
निःश्वसितमस्य वेदा वीक्षितमेतस्य पंच भूतानि॥ स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः॥२॥ षड्भिरंगैरुपेताय
विविधैरव्ययैरपि॥ शाश्वताय नमस्कुर्मो वेदाय च भवाय च॥३॥ मार्त्तंडतिलकस्वामिमहागणपतीन्वयं॥ विश्ववंद्या
न्नमस्यामः सर्वसिद्धिविधायिनः॥४॥ ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे॥ ज्ञानशक्त्यवताराय नमो भगवतो
हरेः॥५॥ नत्वा विशुद्धविज्ञानं शंकरं करुणाकरं॥ भाष्यं प्रसन्नगंभीरं तत्प्रणीतं विभज्यते॥६॥ आचार्यकृतिनिवेश
नमप्यवधूतं वचोस्मदादीनां॥ रथ्योदकमिव गंगाप्रवाहपातः पवित्रयति॥७॥ ॥अथ यदसंदिग्धमप्रयोजनं न च
तत्प्रेक्षावत्प्रतिपित्सागोचरः यथा समनस्केंद्रियसंनिकृष्टः स्फीतालोकमध्यवर्त्ती घटः करटदंता वा तथा चेदं ब्र
श्री ४ । ह्मेति व्यापकविरुद्धोपलब्धिः॥ तथा हि। बृहत्त्वाद्बृंहणत्वाद्वा आत्मा ब्रह्मेति गीयते। स चायमाकीटपतंगेभ्यः आ च देव ॥२॥
र्षिभ्यः प्राणभृन्मात्रस्येदंकारास्पदेभ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो विवेकेनाहमिति असंदिग्धाविपर्यस्तापरो
क्षानुभवसिद्ध इति न जिज्ञासास्पदं। न हि जातु कश्चित्संदिग्धे अहं वा नाहं वेति न च विपर्यस्यति नाहमेवेति। न चाहं
कृशः स्थूलो गच्छामीत्यादिदेहधर्मसामानाधिकरण्यदर्शनाद्देहालंबनोयमहंकार इति सांप्रतं तदालंबनत्वे हि
योहं बाल्ये पितरावन्वभूवं स एव स्थविरे प्रणप्तॄननुभवामीति प्रतिसंधानं न भवेत्। न हि बालस्थविरशरीरयोरस्ति

मनागपि प्रत्यभिज्ञानगोचरो येनैकत्वमध्यवसीयेत। तस्माद्देहेषु व्यावर्त्तमानेषु यदनुवर्त्तते तत्तेभ्यो भिन्नं यथा कुसुमे
भ्यः सूत्रं। तथा च बाल्यादिशरीरेषु व्यावर्त्तमानेष्वपि परस्परमहंकारास्पदमनुवर्त्तमानं तेभ्यो भिद्यते। अपि च स्व
प्नांते दिव्यशरीरमास्थाय तदुचितभोगान्भुंजान एव प्रतिबुद्धो मनुष्यशरीरं आत्मानं पश्यन्नाहं देवो मनुष्य एवेति
देवशरीरे बाध्यमानेपि अहमास्पदमबाध्यमानं शरीराद्भिन्नं जतिपद्यते। अपि च योगव्याघ्रशरीरभेदेप्यात्मानम
भिन्नमनुभवतीति नाहंकारालंबनं देहः। अत एव नेंद्रियाण्यप्यस्यालंबनं इंद्रियभेदेपि योहमद्राक्षं स एवेदानीं स्पृशा
मीत्यहमालंबनस्य प्रत्यभिज्ञानात्। विषयेभ्यश्च स्वस्य विवेकः। स्वावीयानेव। बुद्धिमनसोश्च करणयोरहमिति
तिकर्तृप्रतिभासस्वरूपानालंबनत्वायोगः। कृशोहमंधोहमित्यादयस्तु प्रयोगा असत्यपि भेदे कथंचिन्नेयाः। कौंते
तीत्यादिवदौपचारिका इति युक्तमुत्पश्यामः। तस्मादिदंकारास्पदेभ्यो देहेंद्रियमनोबुद्धिविषयेभ्यो व्यावृत्तः स्फु
टतरोहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धं॥ अप्रयोजनत्वाच्च॥ तथा हि। संसारनिवृत्तिरपवर्ग इ
ह प्रयोजनं विवक्षितं संसारश्चात्मयाथात्म्याननुभवनिमित्तः। आत्मयाथात्म्यज्ञानेन निवर्त्तनीयः। स चेदयमनादिरना
दिनात्मयाथात्म्यज्ञानेन सहानुवर्त्तते कुतोस्य निवृत्तिः। अविरोधात्। कुतश्चात्मयाथात्म्याननुभवः। न ह्यहमित्यनुभ
वादन्यदात्मयाथात्म्यज्ञानमस्ति। न चाहमिति सर्वजनानां स्फुटतरानुभवसमर्पितः। आत्मा देहेंद्रियादिव्यतिरिक्तः। शा
का उपनिषद्भिरहस्यैरपि अन्यथयितुमनुभवविरोधात्। न ह्यागमाः सहस्रमपि घटं पटयितुं ईशते। तस्मादनुभवावि

राम रोधादुपचरितार्था एवोपनिषद इति युक्तमुत्पश्यामइत्याशंक्य वानाशंक्य परिहरति॥ ॥युष्मदस्मत्प्रत्ययगोचरयोरि
ति। अत्र च युष्मदित्यादि मिथ्याभवितुं युक्तमित्यंतः शंकाग्रंथः। तथापीत्यादिः परिहारग्रंथः। तथापीत्यभिसंबंधाच्छे
कार्यीयच्छब्द पातिपठितव्यौ॥ इदमस्मत्प्रत्ययगोचरयोरिति विवक्तव्ये युष्मद्ग्रहणं अत्यंतभेदोपलक्षणार्थं यथा त्वमहंकार
प्रतियोगी। त्वंकारः। नैवमिदंकारः। एते वयमिमे वयमिमौ स्म इति बहुलं प्रयोगदर्शनादिति चित्स्वभाव आत्मा विषयी
जडस्वभावा बुद्धींद्रियं विषया विषयः। एते हि विद्यमाना विज्ञेयं ते अवबध्यंते स्वरूपेण निरूपणीयं पंडवंती ति पावत्
परस्परानध्यासहेतावत्यंतवैलक्षण्ये दृष्टांतस्तमःप्रकाशवदिति। नहि जातु कश्चित्तमुदाचरन् छतिनि। प्रकाशात्तमसो
पर१ वैलक्षण्यात्मकतया इति पंक्तेरर्हतीति तद्दिदृष्टमुक्तं। इतरेतरभावानुपपत्ताविति। इतरेतरभावः इतरेतरत्वं तादात्म्यमि
ति यावत्। तस्यानुपपत्ताविति। स्यादेतत् धर्मा भूत धर्मिणोः परस्परभावः धर्माणां तु ज्ञाड्यचैतन्यानित्यत्वनित्यत्वादी
॥श्री४॥ नामितरत्राध्यासो भविष्यति। दृष्टपते हि धर्मिणोर्विवेकग्रहेपि तद्धर्माणामध्यासः यथा कुसुमाद्भेदेन गृह्यमाणे ॥२॥
पि स्फटिकमणौ अतिस्वच्छतया जपाकुसुमबिंबोद्ग्राहिणि प्रकृते स्फटिक इत्याकृणपवि भ्रमः इत्यत उक्तं तद्धर्माणा
मपीति। इतरेतरत्र धर्मिणि धर्माणां भावो विनिमयः तस्यानुपपत्तिः। अयमभिप्रायः। रूपवद्धि द्रव्यं अतिस्वच्छ
तया रूपवतो द्रव्यांतरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात्। चिदात्मा तु नीरूपो विषयी न विषयच्छा
यामुद्ग्रहीतुमर्हति। यथाहुः शब्दगंधरसानां च कीदृशी प्रतिबिंबता इति। न हि पारस्त्रोष्यादिषपविषयिणोरन्यो

न्यात्मसंभेदेनैव तद्धर्माणामपि परस्परसंभेदेन विनिमयात्मना भवितव्यं। तौ चेद्धर्मिणावत्यंतविवेकेन गृह्यमाणाव
संभिन्नौ। असंभिन्ना४ सुतरां तयोर्धर्माः। स्वाश्रयाभ्यां वा व्यवधानेन दूरापेतवार्त्तं इदमुक्तं। सुतरामिति। तद्विपर्ययेण न
ति। विषयविपर्ययेण। मिथ्याभूतोयमध्यासः एवं च न४ एतदुक्तं भवति अध्यासो भेदाग्रहलक्षणो व्याप्तमतः विरुद्धस्वभावात्ततो भेदग्रह४ सोऽय
हं निवर्त्तयिष्यत्यतोऽप्यसम्भाव्यमपि व्यावर्त्तयतीति। मिथ्येति भवितुं युक्तं यद्यपि तथापीति योजना। इदमत्राकूतं। अभेदेन तद
वयवग्रहमित्यनुभवे आत्मतत्त्वप्रकाशनेन। न चैतदस्ति यथा हि समस्तोपाध्यवच्छिन्नानन्तानन्दचैतन्यैकरससमुदायो न मेक
मप्यितीयमात्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते। न चैतान्यपक्रमपरामर्शोपसंहारे४ क्रियासमभिव्याहारे
णेदन्नात्मतत्त्वसंभिन्नं दधतीति तत्पराणि संति न्यायकोपान्निराक्रियेण अपचरितार्थानि कर्तुं। अभ्यासे हि भूयस्त्वमपभवति स्प७
यथा दध्नाग्निहोत्रं जुहोतीति। एतेनाल्पत्वमपि भोग्यवचोपचरितार्थत्वमिति। अहमनुभवस्तु प्रादेशिकमनेकविध
शोकदुःखादिप्रपंचोपप्लुतमात्मानमादर्शयन्नू कथमात्मतत्त्वगोचरः कथं चानुपप्लुतः४ न च प्रत्यक्षस्य प्रमाण
विरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वं वेति युक्तं। तस्यापौरुषेयतया निरस्तसमस्तदोषाश
क्यस्य बोधकतया स्वतः४ सिद्धप्रमाणभावस्य स्वकार्यप्रमितावनपेक्षत्वात्। प्रमितावनपेक्षत्वेप्युत्पत्तौ प्र
त्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमस्याप्रामाण्यमिति चेन्न। उत्पादकाप्रतिद्वंद्वित्वात्। न खल्वाम्नायज्ञानं सां
व्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहंति येन कारणाभावान्न भवेत्। अपितु तात्त्विकं तच्च न तस्योत्पादकमतान

राम विकप्रमाणभावेभ्योऽसांव्यावहारिकेभ्यस्तत्त्वज्ञानोत्पत्तिदर्शनात्तथा च वर्णेषु ह्रस्वत्वदीर्घत्वादयोऽन्यधर्मा अपि समारो
पितास्तत्त्वप्रतिपत्तिहेतवः॥ नहि लौकिकानां गइति वा नगइति वा पदात् कुंजरं गिरिं वा प्रतिपद्यमानानां भवंति भ्रांता॥ न
चानन्यपरं वाक्यं स्वार्थेऽप्युपचरितार्थं युक्तं उक्तं हि। न विधौ परः शब्दार्थ इति। ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुर्न बाध
धकत्वेऽरजततत्त्वज्ञानस्यापूर्वापूर्वस्य शुक्तिज्ञानेन कनीयसा बाधदर्शनात्। तद्वन्न एवाधन्तदेवाद्यात्मन लक्ष्यो तत्तेरनुप
पत्तेः॥ द्विधितिं विना विकल्पप्रमाणभावस्यानपेक्षत्वं तथा च पारमर्षं सूत्रं। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति। तथा च
पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयतां। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्। अपि च येयमात्मनि अहंकारस्य
प्रमा। स्थिपन्नेरप्यस्यानतानिवृत्त्वमभ्युपेतव्यं। अहमिहैवास्मि सदने जानानः इति सर्वव्यापिनः॥ श्वादेहिं कत्वेलय
३ हातुत्तरगिरिशिखरवर्त्तिषु महान्तरकच्छभूमिषु स्पृहवीप्रवालनिभासि यत्र यवत्। न चेयं देहस्य प्रादेशिकत्वमनु
॥श्री॥ भूयते नत्वात्मन इत्युक्ताः संप्रतीनाहि तद्वै भवति अहमिति गौणत्वेवानुजानाना इति अपि चाप परशब्दः परत्र लक्ष्यमाण ॥३॥
गुणयोगेन प्रवर्त्तते इतीयत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः। स गौणः। स च भेदप्रत्ययो पुरुषः सिंहः न यथा नित्याग्निहो
त्रवचनोऽग्निहोत्रशब्दः प्रकरणांतरावधृत भेदे कौंड पायिनामयने कर्मणि मासमग्निहोत्रं जुहोतीत्यत्र साध्यसादृश्ये
न गौणः॥ माणवके चानुभवसिद्ध भेदे सिंहात्सिंहशब्दः॥ नत्वहंकारस्य मुख्यो यो निर्लुठितगर्भतया देहादिभ्यो भिन्नो
नुभूयते येन परत्र शब्दः शरीरादौ गौणो भवेत्। न चात्यंतनिरूढतया गौणोपि न गौणत्वाभिमानः सार्षपादिषु तैल

शाद्वदितिवेदितव्यं॥तत्रापिहिस्नेहातिशयभवाद्देहेसिद्धएवसार्षपादीनीतिकशाब्दवाच्यत्वमात्राभिमानोनतत्पर्यायोस्तेक
सार्षपयोरभेदाध्यवसायप्रथतस्मिंश्चगौणत्वमुभयपादेशिनोर्गौणमुख्यविवेकविज्ञानेनचव्यावृत्तेः॥तद्विहव्यापकेविवेक
विज्ञानेनिवर्त्तमानेगौणतामपिव्यावर्त्तयतीति॥नचचार्वाकस्यविरशरीरभेदेपिसोहमित्येकस्यात्मनःप्रतिसंधा
नाद्देहादिभ्योभेदेनास्त्यात्मानुभवइतिवाच्यं॥परीक्षकाणांखल्वियंकथानलौकिकानांपरीक्षका अपिव्यवहारसमये
नलौकसामान्यात्मानमतिवर्त्तंते॥अवहृत्यनंतरमेवहिभगवान्भाष्यकारः॥पश्वादिभिश्चाविशेषादितिवाद्यतोऽप्याकुर्वे
शास्त्रचिंतकाःखल्वेवंविवेचयंतिनप्रतिपत्तारइतितस्माच्छरीरव्यतिरिक्तात्मगोचरमहंकारमितास्मिमदर्नेरतिप्रभुजा
नोलौकिकःशरीरादिभेदयतस्तात्मनःप्रादेशिकत्वमभिमन्यतेनभसइवमणिमल्लिकाकपाध्यवच्छेदादितितुकेमु
त्यत्रपामः॥नचाहंकारप्रामाण्यपादेहादिवदात्मापिप्रादेशिकइतियुक्तं॥तदाहरवल्पमणुपरिमाणोवास्याद्देहपरि
माणोवाअणुपरिमाणत्वेस्थूलोहंदीर्घइतिचनस्यात्॥देहपरिमाणत्वेतुसावयवत्वेनपादेहवदनित्यत्वप्रसंगः॥किंचा
स्मिन्पक्षेऽवयवसमुदायस्यवाचेतयेत्प्रत्येकंवाअवयवाः॥प्रत्येकंचैतन्यपक्षेबहूनांचेतनानांस्यातत्राणामेकवाक्य
भावाभावात्पर्यायविरुद्धक्रियतयाशरीरमुन्मथ्येत॥किंचपंवाडसज्येत॥समुदायस्यतुचैतन्ययोगेइवयणएकस्मिन्
न्नवयवेचिद्धात्मनोप्यवयवोह्यक्षणइतिनचेतयेत्॥विज्ञानालंबनत्वेप्यहमित्यस्यभावितवेतदवस्थमेवातस्यक्षिम
वस्तुनिर्भासित्वादस्थिरत्वाच्चविज्ञानानां॥एतेनस्थूलोहंमंधोहंगच्छामीत्यादयोप्यध्यासतयाव्याख्याताः॥तदेव
मुक्तेनक्रमेणात्मस्वरूपेप्रतिक्षिप्तेजीवकर्तृत्वभोक्तृत्वसुखदुःखशोकाद्यात्मकत्वमहमनुभवेऽप्य

×नचबहूनामवयवानांपरस्परमविनाभावनियमोदृष्टःयएवप्रज्ञाविज्ञाणस्तिदातदभावेनचेतयेत३

राम संजितमात्मनोनित्यो हुमर्हतीति। तदेवं सर्वप्रवादिसम्मतिस्मृतीतिहासपुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य स्वरूपनि
मित्तफलैरुपव्याख्यातं अन्योन्यास्मिन्नित्यादि। अत्र चान्योन्यास्मिन् धर्मिण्यात्मशरीरादाविवन्योन्यात्मकताम ध्यस्याह
मिदं शरीरादीति इदमिति च वस्तुतोनुवदतीति ३ लोकव्यवहारो लोकानां व्यवहारः सु चाहमिति व्यपदेशः ३ इति चाध्य प
स्त्रचितमौ शरीराद्यकृत्स्नेऽप्यकृत्स्नमेपज्ञातेप्रमायां प्रमाणेनानुपादानपरिवर्जनाय ३ अन्योन्यधर्मांश्चाध्यस्या
न्योन्यास्मिन् धर्मिणि देहादिधर्मान् जरामरणजन्मव्याध्यादीनात्मनि धर्मिणि अध्यस्त देहादिभावे समारोप्य तथा चेत
न्यादीनात्मधर्मान् देहादावध्यस्तात्मभावे समारोप्याहमिदं जरामरणदुःखभुक्स्थूल्याद्रीति व्यवहारो व्यपदेशः ३
३ इति चाध्यस्य वितथ्य तदनुरूपं ३ अहं स्थ्यादिति। अत्र चाध्यासव्यवहारक्रियाभ्यां ३ कर्त्तीचीतेन ३ समसमान इति समानक
॥श्री४॥ र्तृकत्वेनाध्यस्य व्यवहार इत्युपपन्नं। पूर्वकालत्वस्तचितमध्यासस्य व्यवहारकारणत्वं स्फुरयति। मिथ्याज्ञाननिमि
त्तो व्यवहार ३ मिथ्याज्ञानमध्यासस्तन्निमित्त ३ तत्राचामाभ्यां तद्विधानां व्यवहारभावाभावयोरित्यर्थः ३ तदेवमध्या
सस्वरूपं फलं व्यवहारं चोक्त्वा तस्य निमित्तमाह। इतरेतराविवेकेनेति। विवेकाग्रहणेनेत्यर्थः ३ अथाविवेक एव कुत ॥४॥
स्मान्नभवतीत्यत्राध्यास इत्यत आह। अत्यन्तविविक्तयोः [illegible] धर्मधर्मिणोः परमार्थतो धर्मितोणोरतादात्म्ये
विवेकः ३ धर्माणां चासंकीर्णता विवेकः ३ स्यादेतत्। विविक्तयोर्वस्तुनोर्भेदाग्रहनिबंधनस्तादात्म्यविभ्रमो युज्यते
शुक्तेरिव रजताद्भेदाग्रहनिबंधनस्तादात्म्यविभ्रमः ३ इह तु परमार्थसतश्चिदात्मनोऽत्यन्तभिन्नं न देहादयश्चित्तिवस्तुकस्य
तत्कृतश्चिदात्मनो भेदाग्रहः ३ कुतश्च तादात्म्यविभ्रम इत्यत आह। सत्यानृते मिथुनीकृत्येति। सत्यानृते मिथुनीकृत्य

विवेकाग्रहाद् अध्यासेति योजना । स्वयं चिदात्मा । अन्तःकरणं बुद्धीन्द्रियदेहादिते दे धर्मिणौ मिथुनीकृत्य युगलीकृत्य । नवसीदृति
परमार्थसतो ॥ पारमार्थिकं मिथुनमस्तीत्य ऋतं तत्ज्ञावार्थस्य चेत्र ॥ प्रयोग ॥ एतदुक्तं भवति । अप्रतीतस्यारोपायोगादात्मे
ध्यस्यप्रतीतिरुपपद्यते न वस्त्वसत्त्वेति । स्यादेतत् । आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य स्मारूपेण ॥ समारोपनिबंध
नाच प्रतीतिरिति दुर्वारं परस्पराश्रयत्वमित्यत आह । नैसर्गिक इति । स्वाभाविको नादिरयं व्यवहारः ॥ व्यवहारा
व्यवहारानादित पातकरणस्याध्यासस्यानादित्वोक्तौ । ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरा
देरुत्तरोत्तराध्यासोपयोग इति अनादित्वाद् बीजांकुरवन्न परस्पराश्रयत्वमित्यर्थः ॥ स्यादेतत् । अस्तु पूर्वपूर्वप्रती
तिमात्रमुपयुज्यते आरोपेन तु प्रतीयमानस्य परमार्थसत्ता । प्रतीतिरेव च यत्तास्ततो गगनकमलिनीकल्पस्य दे
हेन्द्रियादेर्नोपपद्यते । प्रकाशमानत्वमेव हि चिदात्मनोऽपि सत्त्वं न तु तदतिरिक्ता सत्तासामान्यसमवायोऽर्थक्रियाकारि
त्वं वा । द्वैतापत्तेः ॥ सत्तायास्त्वर्थक्रियाकारितायाश्च सत्तान्तरार्थक्रियाकारितान्तरकल्पनेऽनवस्थापातात् । प्रकाशमा
नत्वेव सत्ताऽभ्युपेतव्या । तथा च देहादयः ॥ प्रकाशमानत्वान्नासन्तः चिदात्मवत् । असत्त्वे वा न प्रकाशमाना ॥ तत्कथं सत्या
नृतयोर्मिथुनीभावः ॥ तदभावे वा कस्य कुतो भेदाग्रहः ॥ तदभावे कुतोऽध्यासः स्मात्रापवाना हाऽऽहेता । आह कोऽयमध्या
सो नामेति । कस्य का रूपे । समाधत्ते । लोकसिद्धमध्यासलक्षणमाचक्षाणस्यासंपरिहरति । उच्यते स्मृतिरूप ॥ पर
त्र पूर्वदृष्टावभास ॥ अवसन्नोऽवमतो वा भासोऽवभासः ॥ प्रत्ययान्तरबाधश्चास्यावसादोऽवमानो वा एतावता मिथ्या
ज्ञानमित्युक्तं भवति तस्येदमुपव्याख्यानं पूर्वदृष्टेत्यादि । पूर्वदृष्टस्यावभासो पूर्वदृष्टावभासः ॥ मिथ्याप्रत्ययन

राम आरोपविषयारोपणीयमिथुनमंतरेणानसंभवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति। तस्य च दृष्टत्वमात्रमुपयुज्य
ते न वस्तुसत्त्वमिति दृष्टग्रहणं। तथापि वर्त्तमानं दृष्टं नारोपोपयोगीति पूर्वेत्युक्तं। तच्च पूर्वदृष्टं स्वरूपेण सदप्यारोपणीय
तयाऽनिर्वाच्यमित्यनृतं। आरोपविषयं दर्शयति(?)माह। परत्रेति। परत्र शुक्तिकादावित्यर्थः। तदनेन सत्यानृतमिथुनमुक्तं। स्या
देतत्। परत्र पूर्वदृष्टस्यावभास इत्यवलक्षणमतिव्यापकं चेत्। अस्ति हि स्वस्तिमत्यां गवि दृष्टस्य गोत्वस्य परत्र कालाक्ष्यामव
भासः। अस्ति च पूर्वदृष्टस्य देवदत्तस्य पाटलिपुत्रे परत्र माहिष्मत्यामवभासः। अतस्मिंश्चिन्ह। अवभासपदं च समीचीनेऽपि प्रत्यये प्र
सिद्धं। यथा नीलस्यावभासः पीतस्यावभास इत्यत आह। स्मृतिरूप इति। स्मृतेः रूपमिव रूपमस्येति स्मृतिरूपः। असन्निहि
तविषयत्वं च स्मृतिरूपत्वं संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः। स्वप्नज्ञानस्यापि
स्मृतिविभ्रमरूपस्यैवरूपत्वात्। तथाहि स्मर्यमाणे पितादौ निद्रोपप्लववशाद् असंनिधानापरामर्शे इति तत्र पूर्वदृष्टस्यै
॥श्री॥४॥ व सन्निहितदेशकालत्वस्य समारोपः। एवं पीतः शंखस्तिक्तो गुड इत्यत्रापि लक्षणं योजनीयं। तथाहि बहिर्विनिर्गच्छ
द्भिर्नयनरश्मिभिः संपृक्तः पीतद्रव्यवर्त्तिनीं पीततां पीतद्रव्यरहितामनुभवन् शंखं च दोषाच्छादितशुक्लिमानं द्रव्यमात्र ॥५॥
मनुभवन् पीततायाश्च शंखस्य च संबंधमननुभवन् असंबंधाग्रहणसारूप्येण पीतं तपनीयपिंडं पीतं बिल्वफलमित्यादि पूर्व
दृष्टसामानाधिकरण्यं पीतत्वशंखत्वयोरारोप्याह। पीतः शंख इति। एतेन तिक्तो गुड इति प्रत्ययो व्याख्यातः। एवं वि
ज्ञाच्चक्षुषोऽभिमुखेष्वादर्शादिकादिषु स्वच्छेषु व्याहतं तेजो लग्नमपि बिंबोपसारेण तेजसा संवृतिं नीतं प्रवर्त्तितं मुख
संयुक्तं मुखं ग्राहयद्दोषवशात्तस्य देशमनभिमुखत्वं च मुखस्याग्राहयत् पूर्वदृष्टमभिमुखादर्शादिकदेशतामाभिमुख्यं

वमुखस्यारोपयतीति प्रतिबिंबविभ्रमोपि व्याख्यातो भवति। एतेन द्विचंद्रदिङ्मोहालातचक्रगंधर्वनगरवंशोरगादिविभ्रमेष्वपि यथा
संभवं लक्षणं योजनीयं। एतत्तु कथं भवति न प्रकाशमानतामात्रं संवेद्यते न द्वैतेंद्रियादेः प्रकाशमानतया संसर्गो वा भवेत् नहि समा
हितभावेन रज्ज्वादयो वा स्फटिकादयो वा कृष्णपादिगुणयोगिनो न प्रतिभासंते। प्रतिभासमाना वा भवंति तदा लक्षणस्य सा
वात्तथा सति मरुमरीचिषु जलावरणं लक्ष्णतरंगाभिरामाकंपं संपूर्णं भवतां। नामेदृशकिंचित्तद्भिन्नधीपदं दृष्टस्तोयभा
यायोपि प्रियासानुपपन्नाः स्वप्ने। तस्मादकामेनाप्यारोपितस्य प्रकाशमानस्यापि निवर्त्तकसत्वमभ्युपगमनीयं। न च मरीचिरूप
णस्य किंचिदवद्यं स्वरूपेण तु परमार्थसदेव। देहेंद्रियादयस्तु स्वरूपेणाप्यसंतः स्युर्भवदगोचरत्वात्कथमारोप्यंत इति सं
तं। एतावपघसन्नानुभवगोचरः। कथं तर्हि मरीचिष्वाद्याभासः तो यत आनुभवगोचरत्वं न च स्वरूपसत्वेन तत्प्रत्यना
संतो भवंति य एतच्चेतनाभावोनाम भावादन्यः। कश्चिदपि तु भाव एव भावांतरात्मनाऽभावः स्वरूपेण तु भावः। यथा कुंभा
भावांतरमभावो हि क्रिया किंचित्सुव्यपेक्षयेति। ततश्च भावात्मनोपाख्येयतयाऽस्युर्भ्युपेताऽनुभवगोचरताऽप्रपंचस्य पुनरस्ती
तास्ततो निरस्तासमस्तसामर्थ्यस्य निस्तत्वस्य कुतोऽनुभवविषयभावः। कुतो वा चिदात्मन्यारोपः। न च विषयस्य समस्तसा
मर्थ्यविरहेपि ज्ञानमेव तत्ताहक्त्वात्स्वप्रत्ययसामर्थ्यादहस्तीति स्थितिः स्वभावभेदमुपजायमानमसतः प्रकाशयतु तस्मादसत्प्र
काशनशक्तिरेवास्याविद्येति सांख्यते। एतदपि पमभिधासत्प्रकाशनशक्ति विज्ञानस्य किं तु नरस्याः। शक्तीः। असदिति विल्ले
किमेतत्कार्यं आहोस्वित्कारणं। न तावत्कार्यं अलतः सत्यानुपपत्तेः। नापि ज्ञानांतरादनुपपत्तेः। अनवस्थापाताच्च। अवि
ज्ञानस्वरूपमेवासतः प्रकाशः इति चेत् कः पुनरेष सदसतोः संबंधः। असदर्शनं निरूपणं हि सतो ज्ञानस्यासता सबंधेर

राम तिचेत्॥ बृतायमतिनिर्वृत्तः॥ प्रत्ययपतरस्वी पृस्यासत्यपि निरूपणं आयतते न च प्रत्ययस्त्वा धत्ते किंचित्॥ असत आधारत्वा योगात्॥
असदुत्तरेण प्रत्ययो न प्रथते इति प्रत्ययस्यैवेयस्वभावो न बसद्धीनमस्यं किं चिद्दितिचेत्॥ अहो बतायमपास्तसत्पप्रपातो पूर्द्ययमत्व
दुत्पत्तिरत इत्याचतहृ विनाभावु नियतः॥ अत्र पृष्टि तिस्मा हत्यंता संतश्चारी रूपपाद्ये पो निरुक्तत्वा चानुभवगोचरा भवदितुमतं ती
ति॥ ॥अच्चक्रमूषु॥ ॥निरुक्तत्वं चेत्नानुभवगोचरत्वं तत्किं मिद्दानीं मरीचयो पि तो पात्मनाऽसत्त्वं या यद्दनुभवगोचरास्स्युः॥
नदनाथ नसत्त्वं वा॥ नो पात्मनां मरीचीनामसत्त्वात्॥ द्विविधो हि वदन्तु नांत्वसत्त्वमसत्त्वं च तत्र स्वं स्वत स्वपरत्र परतः॥ यथाहुः स्वरूपपर
रूपाभ्यां नित्यं सदसदात्मके॥ वस्तुनि ज्ञायते किंचिद्रूपं कैश्चित्कदाचनेति॥ किं मरीचि पुतोयत्विभामप्रत्ययः॥ तत्त्वगोचरः॥ तया
चसन्नीचीन इति न भ्रांतो नापि बाध्येत अञ्जनबाध्येत यदि मरीचीन तो यात्मतत्त्वानतो यात्मना ग्रह्येत पाता तो पात्मना ऽग्रहणं च
यमभ्रांतत्वं कथं वा बाध्येत हंत तोयाभावात्मना मरीचिना तोय भावात्मत्वे तावच्चमतत् वैयंतोयाभावाभेद न तोय भावात्मता
॥श्री४॥ नुपपत्तेः॥ नापसन्नावस्त्वंतरमेव हि वस्त्वंतरस्यासत्त्वमाश्चीपते॥ भावांतरमभावोऽन्यो न कश्चिदनिरूपणादिति वदद्भिः॥
नवाप्ये पितं वस्त्वंतरं तेष्विमरीचयो वा भेवेत्नु गंगादिमतं वा तो यं॥ एवं स्मिन्कल्वे मरीचुपहतिप्रतीतिः स्यात् तोयमितिउ ॥६॥
तरस्मिन्कल्पे गंगा यां तोयमितिस्यात् च पुनरिहेति दे च भेदास्मरणे तो यमित्येव स्यात् न त्विहेति न चेदमत्यंतमुछं निरस्तसम
स्तवस्तुस्वरूपमलीकमेवास्त इति सांप्रतं तस्यानुभवगोचरत्वानुपपत्तेरिति क्रमधस्तात्॥ तस्मात् सन्नासन्नापि स
दसत्परस्परविरोधादित्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयं तदनेन क्रमेण ध्वस्तं तोयं परमार्पयतीति चेतः जिव
अतएव हि वे वहे व मिव तत्त्वतः क्वन तो यं न पूर्वदृष्टं किंतु नूतनमनिर्वाच्यं एवं च देहे इंद्रियादिप्रपंचो प्यनिर्वाच्यो इति

वंमिथ्याज्ञानोपदर्शितइवपरत्रचिदात्मन्यध्यस्यतइत्युक्तंपर्यन्तं। अध्यासलक्षणयोगात्। देहेन्द्रियादिष्वहंममाभिमानंचोपपादयिष्यते।
चिदात्मातुस्थितिस्मृतीतिहासपुराणगोचरः। तन्मूलतद्विकल्पन्यायनिर्णीतः। श्रुतिहेतुहेतुकस्वभावः। सत्येनैवनिर्वाच्योऽबाधि
तस्वप्रकाशज्ञानमात्रतेवास्यसत्तासाधकरूपमेवचिदात्मनः। नतुतद्व्यतिरिक्तसत्तासामान्यसमवायोऽर्थक्रियाकारितावेतिसर्व
मवदातं। सर्वथायमेवंलक्षणकोऽध्यासोऽनिर्वचनीयः। सर्वेषामेवसंमतः। परीक्षकाणांतत्रहेयपरंविप्रतिपत्तिरितिनिर्वचनायतांस्त
पिलमाह। तंकेचिदन्यत्रान्यधर्माध्यासइतिवदन्ति। अन्यधर्मस्यज्ञानधर्मस्यरजतज्ञानाकारस्येतिपादवत्। अध्यासोऽन्यत्रबा
ह्येसौत्रान्तिकनयेतावद्बाह्यमस्तिवस्तुसत्तत्रज्ञानाकारोऽध्यारोप्यते। विज्ञानवादिनोऽपियद्यपिनबाह्यंवस्तुसत्तथाप्यना
विद्यावासनारोपितमस्त्यलीकंतत्रज्ञानाकारस्यारोपः। उपपत्तिश्चात्र यदाहंरजतमनुभवामीतिस्वरूपंनचाहंरजतमेवाभासयतस्यमितिकत्वमः
अन्यथाहीपुनरस्यबलवद्बाधकप्रत्ययवन्नात्। नेदंरजतमितिबाधकस्येदंतामात्रबाधेनाप्युपपत्तेर्नरजतगोचरता। चिन्ता
रजतस्यधर्मिणोबाधेहिरजतंचतस्यधर्मइदंतावद्बाधितंभवेत्। तद्वरमिदंतैवास्यधर्मोबाध्यतांनपुनारजतमपिधर्मीतिपाच्च
रजतंबहिर्बाधितमर्थादान्तरज्ञानेव्यवतिष्ठतइतिज्ञानाकारस्यैवबहिरध्यासइतिस्थितिः। केचित्तुज्ञानाकारस्याततोवपरितुष्य
तेवदन्ति। यत्रयदध्यासस्तद्विवेकाग्रहनिबंधनोभ्रमइति। अपरितोषकारणंचाहुः। विज्ञानाकारतारजतादेरनुभवाद्ध
वस्थाप्येतानुमानाद्वा। तत्रानुमानमुपरिष्टान्निराकरिष्यते। अनुभवोपिरजतप्रत्ययोवास्याद्बाधकप्रत्ययोवा। न
तावद्रजतानुभवः। सहीदंकारास्पदंरजतमावेदयतिनत्वांतरं। अहमितिहिज्ञानस्यात्मतिप्रत्ययः। प्रत्ययाद्व्यतिरेकोऽत्रभ्रांतं
विज्ञानमंतस्थाकारमेवबाह्यतयाध्यस्यतीतितथाचबाह्यकारास्पदमस्यगोचरः। ज्ञानाकारतापुनरस्यबाधकप्रत्ययप्र

राम वेदनीयेति चेन्न । [illegible]बाधप्रत्ययभावोपपत्त्यापुख्यानात् । किं पुरोवर्त्तिद्रव्यं रजताद्विवेचयति आहो ज्ञानाकारतामस्य दर्शयति
तच्च ज्ञानाकार[illegible]पेद्दर्शने व्यापारं बाधकस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः पुरोवर्त्तिनि प्रतिषेधादर्थो ज्ञानाका
रत इति चेत् । न । [illegible]संनिधानाग्रहनिबंधो हि संनिहितो भवतीति प्रत्युत अत्यन्तसंनिधानं तस्य प्रतिपंचालकेऽतस्त्यां न चेपुर
अतस्य चिरोधोन[illegible]नता पाः किंतु विवेकाग्रहप्रसंजितः स्वरजतव्यवहारस्यानवरजतमेव शुक्तिकापां प्रसंजितं रजतज्ञानेन
न हि रजतनिर्भासनं शुक्तिकालंबनं युक्तं । अनुभवविरोधात् । न खलु सत्तामात्रेणालंबनं तिप्रसंगात् । सर्वेषामर्थानां सत्ता
विशेषादालंबनप्रसंगात् । नापि कारणत्वेन । इंद्रियादीनामपि कारणत्वेन तथात्वप्रसंगात् । तथा च भासमानत्वेनालंबनापि
न च रजतज्ञाने शुक्तिका भासत इति कथमालंबनं । भासमानस्य चालंबनत्वोपगमे वा कथं नानुभवविरोधः । अपि चेंद्रियादीनां समी
॥श्री॥ चीनज्ञानजननसामर्थ्यमुपलब्धमिति कथमेतेभ्यो मिथ्याज्ञानसंभवः । दोषसहितानां तेषां मिथ्याप्रत्यये सामर्थ्यमिति चेन्ना
दोषाणां कार्योपजननसामर्थ्यविघातमात्रहेतुत्वात् । अन्यथा तु दग्धमपि कुटजबीजाद्वटांकुरोत्पत्तिप्रसंगात् । अपि च स्वगोचरव्य
भिचारे विज्ञानानां सर्वेषां नाश्वासप्रसंगः । तस्मात्सर्वं ज्ञानं समीचीनमास्थेयं । तथा च रजतमिदमिति द्वे विज्ञाने स्मृत्यनुभवरूपे । ॥१७॥
तत्रेदमिति पुरोवर्त्तिद्रव्यमात्रग्रहणं दोषवशात्तज्जातं शुक्तित्वसामान्यविशेषस्याग्रहात् तन्मात्रं च गृहीतं सदृशतया संस्कारोद्बोध
क्रमेण रजतस्मृतिं जनयति सा च गृहीतग्रहणस्वभावापि दोषवशाद्गृहीततत्तांशाप्रमोषाद्ग्रहणमात्रमवतिष्ठते । तथा च
रजतस्मृतेः पुरोवर्त्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात् संनिहितरजतगोचरज्ञानसारूप्येणेदं रजतमि
ति भिन्ने अपि ग्रहणस्मरणे अभेदव्यवहारं सामानाधिकरण्यं च प्रवर्त्तयतः । क्वचित्तु गृह्यमाणयोरेव मिथोऽग्रहीतभेदो यथा

पीतऽशंखइति। अत्र हि इति निर्गच्छन्नयनरश्मिवर्त्तिनऽपि त्रडवस्य कावस्येवातिऽस्वच्छस्य पीतत्वं गृह्यते। पित्तं तु न गृह्यते। शंखोपि दोष
वशाच्छुक्लगुणरहितऽस्वरूपमात्रेण गृह्यते। तदनयोर्गुणगुणिनोः संसर्गाग्रहः सारूप्यात्मितत्वनायद्यपि उभयत्र सत्त्वाविरोधेनाभेदव्य
वहारऽसमानाधिकरणव्यपदेशाभ्यामेदाग्रहप्रसंजिता भेदव्यवहारबाधना इन्नेदमितिविवेकग्रहणपूर्वकत्वमपकरणघतो
तदुपपत्तौ च प्राचीनघटत्वपरत्वभ्रांतत्वमपि लोकसिद्धं सिद्धं भवति। तस्माद्यथार्थाऽसर्वे विप्रतिपन्नाः देहे विभ्रमाः प्रत्यपत्ता ख्ये
दिव्यत्वपवनादिदमुक्तं यस्मिन्नच्चुक्तिकादेयस्य रजतादेर्व्यासरति लोकप्रसिद्धिनां सावन्यथाख्यातिनिबंधना। किंतु तस्य रजत
देशत्वस्मरणास्यवगृहीततत्त्वाशाद्यमोषेण गृहीतमात्रस्य पुरइदमिति पुरोवस्थितात् व्यमाचात्तज्ञानात्तु विवेकस्तदग्रहणानिबं
धनोभ्रमः। भ्रांतत्वग्रहणस्मरणयोर्वितरेतरसामानाधिकरण्यव्यपदेशाद्रजतादिव्यवहारश्चेति। अन्नेत्वेत्राप्यपरितुष्यंतोयु
त्रपदप्राप्तस्य सैवविपरीतधर्मत्वकल्पनामाचक्षते। अत्रेदमालूत। अस्तितावद्रजतार्थिनो रजतमिदमितिप्रत्ययात्तु प्रवृत्ति
निवृत्ते प्रवृत्तिऽसामानाधिकरण्यव्यपदेशाभ्यामेतिसर्वजनीनं तेतत्तावद्ग्रहणस्मरणयोःऽतज्ज्ञोचरयोरपि मिथोभेदाग्रहमा
त्राज्जवितुमर्हति ग्रहणानिबंधनो हि चेतनस्य व्यवहारव्यपदेशौ कथमग्रहणमात्राद्भवेतां। ननु नाग्रहणमात्रात्किंतु स्मरणग्रह
णयोरेवमिथऽस्वरूपतो विषयतश्चागृहीतभेदे समीचीनपुरःस्थितरजतज्ञानसारूप्येणाभेदव्यवहारसामानाधिकरण्यव्यप
देशाद्युपपत्त्यऽ। अयसमीचीनज्ञानसादृश्यमनयोर्गृह्यमाणं वा व्यवहारव्यपदेशहेतुः। अगृह्यमाणं वा सत्तामात्रेणाग्रह्य
माणत्वेपि समीचीनज्ञानसारूप्यमनयोरिदमितिरजतमिति च ज्ञानयोर्दिग्ग्रहणं। अथवा नयोरेव स्वरूपतो विषयतश्च
मिथो भेदाग्रह इति ग्रहणं। तत्र न तावत्समीचीनज्ञानसदृशाविति ज्ञाने सती चानज्ञान व्यवहारप्रवर्त्तके। नहि गोसदृशो गवयः
तिज्ञानं गवार्थिनं गवये प्रवर्त्तयति। अनयोरेव भेदाग्रह इति तु ज्ञानं परीक्षितं। नहि भेदाग्रहेऽनयोरितिभवति। भेदग्रहणमिति च

राम भवन्ति तस्मामात्रेण भेदाग्रहोऽगृहीत एव व्यवहारहेतुरिति वक्तव्यं। तत्र किमयमारोपोत्पादक्रमेण व्यवहारोक्तः। आहोस्विदनुत्पादितारोपप
वस्थत इति विकल्पद्वयमभ॥ चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेरारोपोत्पादक्रमेणैवेति। ननु सत्यं न चेतनव्यवहारोऽज्ञानपू
र्वकः किंतु अविदितविवेकस्मरणग्रहणपूर्वक इति मैवं। न हि रजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्त्युपयुज्यते। इदंकारास्पदे तामि
मुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवादं। कथं चायमिदंकारास्पदे प्रवर्त्तेत यदि न तदिच्छेत्। अन्यदिच्छत्यन्यत्करोतीति व्याहतं। न
चेदंकारास्पदं रजतमिति कथं रजतार्थी तदिच्छेत्। न घटार्थी पटमाहरणादिति ब्रूयात्। सन्नति वक्तव्यमघटार्थी घटार्थी नायहरणात्कस्मान्नो
पेक्षेतेति। सोऽयमुपादानोपेक्षाभ्यामभिमत आक्षेपमाणश्चेतनोऽव्यवस्थितः इदंकारास्पदे रजतसमारोपेणोपादत्त एव व्यवस्थाप्यत इ
ति भेदाग्रहः समारोपोत्पादनक्रमेण चेतनप्रवृत्तिहेतुः। तथा हि भेदाग्रहादिदंकारास्पदे रजतत्वसमारोपस्तज्ज्ञानाच्चोपकारभाव हेतु
मुपचिंत्यत ज्ञातीयतया इदंकारास्पदे तमनुमापयन्ति तदर्थी प्रवर्त्तत इत्यानुपूर्व्यं सिद्धं। न च तत्र रजतस्मृतिरिदंकारास्पदस्योप
३ ॥श्री४॥ कारहेतुभावमनुमापयितुमर्हति। रजतत्वहेतोरप्रत्यक्षधर्मत्वात्। एकदेशादर्शने लिङ्गस्यानुमापकत्वं नैकदेशदर्शने। यथा कुष्ठ
ज्ञातसंबंधस्यैकदेशादर्शनादिति। समारोपे त्वेकदेशदर्शनमस्ति। न तु सिद्धमेतत्। द्विविधा ह्याप्तिस्तं रजतज्ञानं पुरोवर्त्तिवस्तु वि ॥८॥
षयं रजतार्थिनि श्चितं नियमेन प्रवर्त्तकत्वात् पदार्थिनं नियमेन यत्र प्रवर्त्तयति तज्ज्ञानं तद्विषयं। यथा भयवादि सिद्धसमीचीन
रजतज्ञानं तथा चेदं तस्मात्तथेति। यदुक्तमनवभाससमानतया न शुक्तिकालंबनमिति तत्र भवानपृष्टो व्याचष्टां। किं शुक्तिका
त्वस्येदं रजतमिति ज्ञानं प्रत्यनालंबनत्वं। आहोस्वित्तद्व्यभासस्य पुरःस्थितस्य सितभास्वरस्य। यदि शुक्तिकात्वस्यानालं
बनत्वं। अत एव उत्तरस्यानालंबनत्वं ब्रुवाणस्य न केवलानुभवविरोधः। तथा हि रजतमिदमित्यनुभवन्ननुभविता पुरोवर्त्तिवस्तु
अंगुल्याभिनिर्दिशति। इदमित्थं तु सन्तानकारणानां मोत्सर्गिककार्यप्रतिबंधेन कार्यान्तरोपजननसामर्थ्यं। यथा दावाग्निदग्धा

नांवेत्रबीजान्नीकदलीकांडजनने। भस्मकदुष्टस्यैवौदर्यस्यतेजसोवह्न्यन्नपानपचनेइति। इत्यत्रबाधकाप्रकृतविपर्ययंविभ्रमाणांयथार्थत्वानुमान
माभासः४ कुतस्तह्यनुमानवत्। यदुक्तंमिथ्याप्रत्ययस्यव्यभिचारेसर्वप्रमाणेष्वनाश्वासइतितत्रबाधकत्वेनखलुतत्प्रमाणानांव्य
भिचारेणेतिव्यक्तत्वादुपद्रवस्याभिप्रपरिकृतन्यायकणिकायामितिनेहप्रतन्यते। द्विभाष्यंवास्यस्मृतिप्रमोषभीरुश्लोकैर्विस्तरस्तत्व
मीमांसायामस्माभिर्गतव्यइति। तदिहसंक्षेपमन्येतुयत्रयद्ध्यासस्तस्यैवविपरीतधर्मत्वकल्पनामाचक्षतेइति। यत्रशुक्तिकादौयस्यरजता
देरध्यासस्तस्यैवशुक्तिकादेर्विपरीतधर्मत्वकल्पनारजतत्वधर्मत्वकल्पनामितियोजना। ननुसंतुपरीक्षकाणांविज्ञप्तिप्रत्ययः४प्रक
तेकिमायातमित्यतआह। सर्वथापित्वन्यस्यान्यधर्मतांनव्यभिचरतीति। अन्यस्यान्यधर्मत्वकल्पनाऽनृततासाचानिर्वचनीयेत्यर्थ
स्तादुपपादितेतितेनसर्वेषामेवपरीक्षकाणामतेऽन्यस्यान्यधर्मकल्पनानानिर्वचनीयाऽवर्यस्वरूपभाविनीतिअनिर्वचनीयतासर्वसि
द्धांतस्यार्थः। अस्याख्यातिवादिभिरकामैरपिसामानाधिकरण्यव्यवहारदर्शनादभ्युपेयमितिभावः। नकेवलमिप
मन्ततत्परीक्षकाणांसिद्धाऽपितुलौकिकानामपीत्याह। तथाचलोकेऽनुभवः४शुक्तिकारजतवदवभासतइति। ननुनारजतमि
मितिनिषेधः४स्यादेतत्। अन्यस्यान्यात्मताविभ्रमोलोकसिद्धः४एकस्यतुभिन्नस्यभेदविभ्रमोनदृष्टइतिकुतस्त्विदात्मनाऽभि
न्नानांजीवानांभेदविभ्रमइत्यतआह। एकश्चंद्रःसद्वितीयवदिति। पुनरपिचिदात्मनाध्यासमाक्षिपति। कथंपुनः४प्रत्यगात्मन्य न१
विषयेध्यासोविषयधर्माणां। अयमर्थः४चिदात्माप्रकाशात्मनवाऽनुचेत्प्रकाशात्मकथमस्मिन्नध्यासोविषयधर्माणां। नखल्वप्रति
भासमानेपुरोवर्तिनिद्रव्येरजतस्यवातद्धर्माणांवासमारोपः४संभवतीति। प्रतिभासेवानतावदयमात्माजडोघटादिवत्स्वाधी
नप्रकाशत्वादितिप्रकृते। नखलुसएवकर्मकर्ताचभवतिविरोधात्। परसमवेतक्रियाफलशालितहिकर्मनचज्ञानक्रियापरसमवायि

यमा३

राम नानिकयमनस्यात्कर्म। न च तदेव स्वं च परं च विरोधात्। आत्मांतरसमवायि फलमेतु ते प्रस्यात्मनोनात्मत्वप्रसंगः। एवं च तत्समानस्येतरन्
वस्थापत्तेः। स्यादेतत्। आत्माजडोपि सर्वार्थज्ञानेषु भासमानोपि कर्तैव न कर्म परसमवेतक्रियाफलशालित्वाभावात्। चैत्रवत्। यथा हि
चैत्रसमवेतक्रियया देवदत्तगतप्राप्तोऽभयसमवेतायामपि क्रियायां परस्यैव कर्मता। परसमवेतक्रियाफलशालित्वात्। न तु स्वे च स्य
क्रियाफलभाजोपि चैत्रसमवायात्प्रभवक्रियायाः इति। तच्चाप्रकृतिविरोधात्। प्रकृते हि सत्यज्ञानमनंतं ब्रह्मेति। उपपत्तेश्च। तथाहि
योयमर्थप्रकाशः फलं कर्मस्थमिष्यते भवद्भिः स किंजडः स्वयंप्रकाशो वा। जडश्चेद्विषयात्मानाव प्रकाशाविति कस्मात्। किं प्र
काशांतराविनिर्भासात्मा धर्मो नावस्थायी नन्वेतपा। तथा सु भावकः। अंधस्येवादर्शन्तस्यादिनिपातः। प्रदीपदृशांतिः। न चावित्ती न मेव विज्ञान
नमथात्मानोज्ञापयतितदस्तु रादिविदितिवाच्यं। ज्ञापनं हि ज्ञानजननं जनितं च ज्ञानं जडं सन्नालोकरूपं पदं नाति वर्त्तते। एवमुत्तरोत्तरमपि ज्ञाना
॥भा०॥ नि जडानि त्यनवस्था। तस्मादपराधीनप्रकाशा संविदुपेतव्या। तथापि किमायातं विषयात्मनोः स्वभावजडयोः। एतदायातं यत्तयोः
संविदजडेति। तत्किं पुनरयं पंडित इति पितापि पंडितोस्तु। स्वभाव एव स वेदितुः स्वयंप्रकाशायायं यदर्थात्मसंबंधितेति चेत्। हं ॥२०॥
तत्पुत्रस्यापि पंडितस्य स्वभाव एव पितृसंबंधितेति समानं। सहोपलंभप्रकाशेन संवित्प्रकाशेन त्वयात्मप्रकाशो विनात
स्यात्स्वभाव इति चेत्। तत्किं संविदो भिन्नौ संविदर्थात्मप्रकाशौ। तथा च न स्वयंप्रकाशा संवित्। न च संविदर्थात्मप्रकाशः ह
ति। अथ संविदर्थात्मप्रकाशो न संविदो भिद्येते संविदेव तौ। एवं तर्हि यावदुक्तं भवति संविदात्मा प्रसिद्ध इति तावदुक्तं भवति संवि
दर्थात्मप्रकाशोस्मीति। तथा च न विवहितापि सिद्धिः। न चातीतानागतापरोक्षवत्रायाः संविदो ऽर्थसहभावोपि तद्विषयता
नोपादानोपेक्षाबुद्धिजननादर्थसहभाव इति चेत्। न। अर्थसंविदश्च तासां नादिबुद्धीनामपि तद्विषयतानुपपत्तेः। हानादि जन

लप

×अप्राकाश्यानिर्वचनीयेभ्यो देहेंद्रियादिभ्य आत्मानं भिनत्ति यन्निर्वचनीयमंवत्तिविजातीतिप्रत्यक्‌ सचासावात्माचेतिप्रत्यगात्मा ७

नाज्ञानादिबुद्ध्यन्तानामर्थविषयत्वे अर्थविषयज्ञानादिबुद्धिजनकाख्यार्थसंविदस्तद्विषयत्वमिति चेन्नातत्किं देहस्य घटपटवदात्मसंयोगो हेतुरुत
त्तिनिहत्तिहेतुरर्थस्य यथा प्रकाशोऽस्त्विति जाड्याद्देहात्मसंयोगो नार्थप्रकाश इति चेत् नन्वयं प्रकाशोऽपि स्वात्मन्येव घटवत्प्रकाशो
थे तु प्रकाशकं किं रूपादिवन्न च प्रकाशस्यात्मनो विषयत्वे तिरोहितच्छिन्नदीपस्येव तदा तु भूयते प्रकाशाख्याप्रमातरोऽस्मद्बोधेन पुरुषस्या
दाघस्येति प्रकाशाने। तस्मादेकस्मिन्नप्रकाशमाने चैतन्यानुभूयमानत्वं इति द्वितीयत्वे प्रमा ४ प्रकाशादन्यो बोधोऽनिर्वचनीय एवेति युक्तमु
त्पत्रया मत ४। न चास्य प्रकाशस्याजानतः स्वलक्षणभेदोऽनुभूयते। न चानिर्वाच्यत्वमाख्याभेदः ४ प्रकाशान्तिर्वाच्यो भेत्तुमर्हति। अतिप्रसंगा
त्। न चाद्यन्तानामपि परस्परं भेदसमावीनज्ञानपक्षेऽतिमध्यास्तु इत्यपरिहारादुपपाद्यिष्यते। तदयं प्रकाश एव स्वयं प्रकाश एकः ४ रूढस्वो
नित्यो निरंतराः ४ प्रत्यगात्मा सचापराधीनप्रकाशत्वाद् अनन्तात्मावाविषयस्तस्मिन्नध्यासो विषयधर्माणां देहेन्द्रियादिधर्माणां कथं
मा दृशे। अयुक्तोऽयमध्यास इत्याहेपु ४। कस्माद्युक्तः इत्यत आह। सर्वो हि पुरोवस्थिते विषये विषयान्तरमध्यस्यति एतदुक्तं भवति। यत्प
राधीनप्रकाशमन्नावस्तु तत्सामान्याग्रहे कारणदोषाद्विभ्रमोपायहेऽन्यथा प्रकाशते प्रत्यगात्मा त्वपराधीनप्रकाशत्वात् यानस्वज्ञा
नकारणान्यपेक्षते येन तदाश्रयैर्दोषैर्दुष्येत। न चांशवान्येन कश्चिदस्यांशो गृह्येत कश्चिन्न गृह्येत न हि तदेव तदानीमेव तेनैव गृ
हीतमगृहीतं च भवति इति न स्वयं प्रकाशे प्रत्यध्यासः। संभवति तेनैव प्रकाशो पुरोवस्थितत्वस्यापरोक्षत्वस्याभावान्नाध्यासः ४। न हि
शुक्तावपुरःस्थितायां रजतमध्यस्यति इदं रजतमिति। तस्मात् तत्त्वग्रहेऽसतायत्ते च नाध्यास इति सिद्धं। स्यादेतत्। अविषयत्वे चिदा
त्मनो नाध्यासः ४ विषय एव तु चिदात्माऽस्मत्प्रत्ययस्यत कथं नाध्यासः इत आह। युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वेन वा
धि। विषयत्वे हि चिदात्मनोऽन्यो विषयी भवेत्तथा च यो विषयी स एव चिदात्मा विषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः ४॥

राम तस्मादनात्मत्वप्रसंगान्न वस्तुतापरिहारायाप्युपेतव्यं अत एवाविषयत्वे आत्मनो वक्ष्यंते पाख्यना ध्यास इत्यर्थः। परिह
रति। कुत्रस्येन तावदयमेकां तेनाविषयः कुतः। अस्मत्प्रत्ययविषयत्वात्। अयमर्थः। अस्मत्प्रत्ययगात्मा स्वप्रकाशोऽपि चिद्विष
यः। अनन्तरः स्य। तथापि निर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनः सूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतो
वच्छिन्न इव अभिन्नोऽपि भिन्न इवाकर्तापि कर्तेवाभोक्तापि भोक्तेवाविषयोऽप्यस्मत्प्रत्ययविषय इव जीवभावमापन्नोऽवभा
सते नभ इव घटमणिकमल्लिकाद्यवच्छेदभेदेन भिन्नमिवानेकमिवेति। न हि चिदेकरसस्यात्मनश्चिदंशो [illegible]ते।
तेऽगृहीतं किंचिदस्ति। न खल्वानंदनित्यत्वविभुत्वादयोऽप्यस्य चिद्रूपाद्वस्तुतो भिद्यंते येन तद्ग्रहेऽप्यगृहीता एवं तु क
ल्पितेन भेदेनाविवेचिता इति अगृहीता इव भांति। न चात्मनो बुद्ध्यादिभ्यो भेदः स्वाभाविको येन विषयात्मनि गृह्यमाणोऽपि गृह्ये
तो भवेत्। बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याप्यनिर्वाच्यत्वात्। तस्माच्चिदात्मनः स्वप्रकाशत्वात् सदैवानवच्छिन्नस्यावच्छि
३ ॥श्री॥४॥ न्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात्तदध्यासेन जीवभाव इति। तस्यैवानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते। तथाहि क ॥२०॥
र्ता भोक्ता चिदात्मा अहंप्रत्यये प्रत्यवभासते। न चोदासीनस्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति। यस्य च बुद्ध्यादेः कार्य
करणसंघातस्य क्रियाभोगशक्ती न तस्य चैतन्यं। तस्माच्चिदात्मैव कार्यकरणसंघातेन ग्रथितो लब्धक्रियाभोगशक्तिः स्व
यंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदं जीव इति च जंतुरिति च क्षेत्रज्ञ इति चाख्याय
ते। न खलु जीवश्चिदात्मनो भिद्यते। तथा हि श्रुतिः। अनेन जीवेनात्मनेति। तस्माच्चिदात्मनोऽव्यतिरेकाज्जीवः स्वप्रकाशोऽपि
अहंप्रत्ययेन कर्तृत्वभोक्तृत्वाश्रयव्यवहारयोग्यः क्रियत इत्यहंप्रत्ययालंबनं उच्यते। न चाध्यासे सति विषयत्वे विषयत्वे चाध्यास इत्यन्यो

न्याश्रयमिति सांप्रतं। बीजांकुरवदनादित्वात् पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधात् इति फलितं। नैसर्गिको
ऽयं लोकव्यवहार इति भाष्यार्थेन। तस्माद्युक्तं तावदयमेकान्तेनाविषय इति। जीवो हि चिदात्मतया स्वप्रकाशतया ऽविषयोऽप्यौ
पाधिकेन रूपेण विषय इति भावः। अस्यार्थस्य तत्त्वं प्रत्यक्पराधीनप्रकाशत्वात् अविषयत्वेनाध्यासमपाकुर्मः। किंतु प्रत्यगात्मा न स्वतो
नापि परतः प्रथत इति अविषय इति ब्रूमः। तथा च सर्वथा ऽप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इत्यत आह। अपरोक्षत्वाच्च प्रत्य
गात्मप्रसिद्धेः। प्रतीच आत्मनः प्रसिद्धिः प्रथा तस्या अपरोक्षत्वात्। यद्यपि च प्रत्यगात्मनोऽनन्याश्रयास्ति तथापि तथापि भेदोपचा
रः यथा राहोः शिरः चैतन्यमिति। एतदुक्तं भवति। अवेद्यत्वे विद्यमानस्याऽपरोक्षोऽरूपेऽपि दृष्टत्वात् सर्वस्य अप्रयत्नेन जगदान्ध्यप्रसंगा
दित्युक्तं। श्रुतिश्चात्र भवति। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। तदेवं परमार्थपरिहारमुक्त्वाऽभ्युपेत्यापि वि
दात्मनः परोक्षत्वाऽपरोक्षत्वादिना परिहारांतरमाह। न चायमस्ति नियमः पुरोऽवस्थित एव विषये विषयांतरमध्यसितव्य
मिति कस्मादयं नियम इत्यत आह। अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनतादि अध्यस्यन्ति। यस्माद्येनेन्द्रियेण वस्तु परस्परं वि
षयान्तराध्यासे इन्द्रियजन्यत्वं नापि मानसत्वं मनसो ऽसहायस्य बाह्ये ऽप्रवृत्तेः। तस्मादप्रत्यक्षे। अथ च तत्र बाला अविवेकिनः परदृ
ष्टिं दृष्टिनः केचित्पार्थिवच्छायां रूपामतामारोप्य कदाचित्तैजसं शुक्लतामारोप्य नीलोत्पलपलाशश्यामलमिति वा राजहंस
मालाधवलमिति वा वर्णयन्ति। तच्चापि पार्थिवस्य तैजसस्य रूपं नभसि रूपवतो रूपस्य नभसि स्मृतिरूपोऽवभास इति। एवं तद्वत्तलम
ध्यस्यन्ति अवाङ्मुखीभूतमहेन्द्रनीलमणिमयमहाकटाहकल्पमित्यर्थः। उपसंहरति। एवमुक्तेन प्रकारेण सर्वाक्षेपपरिहारा
दविरुद्धः प्रत्यगात्मन्यनात्मनां बुद्ध्यादीनामध्यासः। ननु सन्ति सहस्रमध्यासास्तत्किमर्थमयमेवाध्यास आक्षेपसमाधानाभ्यां

ख्वद्यत इति प्रत्यगात्मन्यनात्माध्यास एव सर्वानर्थहेतुः ४ न तु नारजतादिविभ्रमा इति २

राम कत्वाद्यतेनाध्यासमात्रमित्यत आह। नमेवं वक्तृणमध्यासं पंडिता अविद्येति मन्यंते अविद्या हि सर्वानर्थबीजमिति स्मृतिस्मृती
तिहासपुराणेषु प्रसिद्धं तदुच्छेदाय च वेदांता प्रवृत्ता इति सैवाविद्या तत्स्वरूपं चाज्ञातनत्वंका मुमुक्षुमिति न देव कत्वाद्यं
नाध्यासमात्रं अत्र चैवं वक्तृणमित्येवं रूपत्वयानर्थहेतुतोक्ता यस्मात्प्रत्यगात्मनि अचानापादिरहितेऽवनाया कपैतांतःक
रणारोपणं प्रत्यगात्मानमदुःखं दुःखं वा करोति तत्स्मादनर्थहेतुः ४ मवैवं एवं ग्रजना अपि मन्यंते येन न वकत्वाद्येतेत्यत उक्तं
पंडिता मन्यंत इति नरूपमनादिरिति निरूढनिविडवासनानुबंधाविद्यान्त्राक्वानिरोधु उपायाभावादिति यो मन्यते तं
प्रतितन्निरोधोपायमाह। तद्विवेकेन च वस्तुस्वरूपावधारणं निर्विचिकित्संज्ञानं विद्यामाहुः पंडिताः ४। प्रत्यगात्मनि रखत्वं
तद्विविक्ते बुद्ध्यादिभ्यो बुद्ध्यादि भेदायतनिमित्तो बुद्ध्याद्यात्मत्वं तत्स्मोध्यासः ४ तेन श्रवणमननादिभिर्यद्विवेकविज्ञानं तेन विवेको
।।श्री४।। यह निवर्त्तितेऽध्यासापवादात्मकवस्तुस्वरूपावधारणं विद्याचिदात्मरूपं स्वरूपं यैवेति स्तरस्तार्थः ४। स्यादेतत्त्र्याजतिनिरू
ढनिविडवासनानुबंधाविद्याविद्यापबाधिताप्रविद्यावासनावन्त्रानुनक्षे विपत्तिप्रवर्त्तियिष्यति च वासनादिकापंखांचित ।।१२।।
मित्यत आह। न चैवं सति एवं भूतवस्तुतत्वावधारणे सति यद्यपद्यासिस्तत्र तेन दोषेन पणुणेन वा ४ पुमात्रेणापि सन संबध्य
ते अंतःकरणादिदोषेणात्मानात्मादिना चिदात्मा चिदात्मनोगुणेन चैतन्यानंदादिनांतःकरणादिन संबध्यते एतदुक्तं भवति
नत्वावधारणाध्यासस्याहि स्वभावएवैताह ध्यापदनादिमपि निरूढनिविडवासनापि मिथ्याज्ञत्य पमपनय तितत्वु एकरूपतो हि
स्वभावोविपां पक्षपातु बुद्ध्यात्मा ४। निरुपद्रवभूतार्थस्वभावस्यविपर्यये ४। न बाधो यत्नवत्त्वेपि बुद्धेस्तत्पक्षपातत इति ४ चिद्रूपतस्तल्
चिदात्मस्वभावस्य तत्वज्ञानस्यांतं तांतरगास्य कुतो निर्वाच्यापाधिष्पापाबापति यदुक्तं सत्यानृते मिथुनीकृत्य विवेकाग्रहादर्थं

स्यातमिदंममेदमितिलोकव्यवहारइति।तत्रव्यपदेशकरूपोव्यवहारःकंठोक्तः।इतिशब्दसूचितंलोकव्यवहारमादर्शयति।तमेत
मविद्याख्यमिति।निगदव्याख्यातं।आक्षिपति।कथंपुनरविद्यावद्विषयाणिप्रमाणानितत्त्वपरिच्छेदोहिप्रमातद्विघात
साधनानिप्रमाणानिकथमविद्यावद्विषयाणि।नाविद्यावंतमाश्रयंतिप्रमाणानितत्कार्यस्य[illegible]चापाअविद्याविरोधि
त्वादितिभावः।अस्तुवाअध्यक्षादीनिसंहत्यापियथातथाशास्त्राणितुउक्तरूपहितानुशासनपराणिअविद्याप्रतिपक्षतयाना
विद्यावद्विषयाणिभवितुमर्हंतीत्यर्थः।[illegible]हाशास्त्राणिचेति।समाधत्ते।उच्यतेदेहेंद्रियादिष्वहंममाभिमानहीनस्यतादात्म्यतत्सं
सर्गाध्यासहीनस्यप्रमातृत्वानुपपत्तौसत्यांप्रमाणप्रवृत्त्यनुपपत्तेः॥अयमर्थःप्रमातृत्वंहिप्रमांप्रतिकर्तृत्वंतच्चस्वा
तंत्र्यंचप्रमातुरितरकारकाप्रयोज्यत्वेसतिसकलकारकप्रयोक्तृत्वंतदनेन॰प्रमाकरणंप्रमाणंप्रयोजनीयंनचस्वव्या
पारमंतरेणकरणंप्रयोक्तुमर्हति।नचकूटस्थोनित्यश्चिदात्माऽपरिणामीस्वतोव्यापारवान्।नस्माद्व्यापारवद्बुद्ध्यादितादात्म्या
ध्यासाद्व्यापारवत्तयाप्रमाणमधिष्ठातुमर्हतीतिभवत्यविद्यावद्विषयत्वंअविद्यावदुक्तरूपाध्यासवत्पुरुषप्रमाणानामिति।
अधिष्ठेयमाप्रवर्त्तयितृप्रमाणानिकिंनः।छिन्नमस्ततआह।नहींद्रियाण्यनुपादायप्रत्यक्षादिव्यवहारःसंभवतीति।व्यवहारपदेन
नेतिव्यवहारःफलंप्रत्यक्षादीनांप्रमाणानामित्यर्थः।इंद्रियाणीतींद्रियलिंगादीतिद्रष्टव्यं।दृष्टिनोगछंतीलिप्तताएवप्रत
क्षादीतरूपपद्यतेव्यवहारक्रिययाव्यवहारयक्षेपात्समानकर्तृकता।अनुपादायपदंव्यवहारइतियोजना।किमितिद्युतः
प्रमातोपादत्तेप्रमाणानिअयसथपमेवकस्मान्नप्रवर्त्ततइत्यतआह।नचाधिष्ठानमंतरेणेंद्रियाणांप्रमाणानांव्यवहारः
संभवतीति।नजातुकिंचित्करणान्यनधिष्ठितानिकर्तृत्वकार्यपद्याग्रियेतेमातन्तुविंदविरहितेभ्योवेमादिभ्यःपटोत्पत्तिरिति।

राम अथ देह एवाधिष्ठाता कस्मान्न भवति कुतस्स आत्माध्यासेनेत्यत आह। तानचान ध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते। सुषुप्तेप्यिव्या
पारप्रसंगादिति भावः॥ स्यादेतत्। यथानध्यस्तात्मभावं वेमादिकं कुविंदो व्यापारयन्पटस्य कर्त्ता एवमनध्यस्तात्मभावं देहं इं
द्रियादिव्यापारयन्नुभविष्यतीति तदभिप्र --- नेत्यत आह। न चेतस्मिन्सर्वस्मिन्नितरेतरात्माध्यासे इतरेतरधर्माध्यासे वासति
असंगस्य सर्वथा सर्वदा सर्वधर्मधर्मिविमुक्तस्य प्रमातृत्वमुपपद्यते। व्यापारवंतो हि कुविंदादयो वेमादीनधिष्ठाय व्यापारयंति
अनध्यस्तात्मभावस्तु देहेंद्रियादिष्वात्मनो न व्यापारसंभवः असंगत्वादित्यर्थः॥ आत्माध्यासाश्रयाणि प्रमाणानीत्याह। न
चप्रमातृत्वमंतरेण प्रमाणप्रवृत्तिरस्ति। प्रमायां स्वफले स्वतंत्रः प्रमाता भवति। अंतःकरणपरिणामभेदः प्रमेयप्रवणः कर्त्तृस्थः
श्चित्स्वभावः प्रमा कथं च जडस्यांतःकरणस्य परिणामश्चिद्रूपो भवेत्। यदि चिदात्मा न तत्राध्यस्येत। कथं चैष चिदात्मकर्त्तृको भ
वेत्। यद्यंतःकरणं व्यापारवच्चिदात्मनि नाध्यस्येत। तस्मादितरेतराध्यासाच्चिदात्मकर्त्तृस्थः प्रमाफलं सिध्यतीति तत्सिद्धौ च प्रमा
॥श्री॥४॥ तृत्वं तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः॥ प्रमातृत्वे न च प्रमाफलं हीयते। प्रमायाः फलस्याभावे प्रमाणं न प्रवर्त्तेतात
प्रामाण्यमप्रमाणं स्यादित्यर्थः॥ उपसंहरति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि। स्यादेतत्। भवतु प्रत्य
क्षादीनामेवं आगमोपपत्तिजातिपन्नप्रत्यगात्मतत्वानां कृतस्नानामपि पुंसां प्रमाणप्रमेयव्यवहारादर्शनात् इति कथम ॥१२॥
विद्यावद्विषयाण्येव प्रमाणानीत्यत आह। पश्वादिभिश्चाविशेषादिति। विदुषामागमोपपत्तिभ्यां देहेंद्रियादिभ्यो भिन्नं प्रत्य
गात्मानं प्रमाणप्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मं नातिवर्त्तंते। पश्वादयो हि प्रसिद्धचाकुंतादानामविद्यातिपन्नसुरूपभावानां व्यवहा
रस्तादयोऽकृतस्नानामपि पुंसां हत्वप्रेते तेन तत्सामान्यात्तेषामपि व्यवहारसमयेऽविद्यावत्त्वमनुमेयं। चकारोऽध्यास समुच्चयेऽत्र
क्तां कानिवृत्तिन्निसहिता पूर्वोक्तो एवन्नित्रविद्यावद्विषयत्वं प्रमाणानां साधयतीत्यर्थः॥ एतदेव विभजते। यथा हि पश्वादय इति। अ

चक्षुरादिभिः श्रोत्रादीनां संबंधे सतीति प्रत्यक्षप्रमाणं दर्शितं चक्षुरादिविज्ञानस्येति तत्फलमुक्तं। प्रतिकूलस्येति चानुमानफलं। तथाहि
शब्दादिस्वरूपमुपलभ्य तज्जातीयप्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनुमिमीतेति। उदाहरति य
थादंडं विद्रोपमतिरोहितार्थं स्यादेतत्। भवतु पश्वादीनां अविद्यावद्विषयाणि। शास्त्रं तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादि
न देहात्माध्यासेन प्रवर्तितुमर्हति। अत्र खल्वामुष्मिकफलोपभोगयोग्योऽधिकारी प्रतीयते। तथाच पारमर्षं सूत्रं। शास्त्रफलं प्र
योक्तरि तल्लक्षणत्वादिति। न च देहादिभस्मीभूतं पारलौकिकायकल्पते इति देहाद्यतिरिक्तं चिदात्मानं अधिकारिणमाक्षि
पति। शास्त्रं तत्कथमध्यासं विद्येति कथमविद्यावद्विषयं शास्त्रमित्यत्रोक्तमाह। शास्त्रीयेत्विति। तुशब्दः प्रत्यक्षादिव्यवहाराद्भि
नत्ति शास्त्रीयं अधिकारं। शास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबंधं विना न निर्वहतीति तावन्मात्रमाक्षिपेत् न तस्यासंसा
रित्वमपि तस्याधिकारेनुपयोगात्। प्रत्युत औपनिषदस्य पुरुषस्याकर्तुरभोक्तुरधिकारविरोधात्। उपयोक्ता हि कर्मणः कर्म
जनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति। तत्र कथमकर्ता प्रयोक्ता कथं वा अभोक्ता कर्मजनितफलभाग्भागी। एवं
वेदांता अप्यविद्यावत्पुरुषविषया एव। न हि प्रमात्राद्यविभागाद् ऋते तत्त्वमर्थावगमः। न च विद्यावन्तमनुशासति निष्प्रपंचे निरवि
द्ये विद्यमनुविष्टस्वरूपे प्रवस्थापयति। एतावानेव विशेषः। तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धं। स्या
देतत्। एवमपि विरोधानुपयोगाभ्यामौपनिषदः पुरुषोऽधिकारेनापेक्ष्यते। नयाप्यपरिचयज्ञो ऽस्याप्यमानवभ्रान्तो वाधिकारं
निर्वोढुं तथा च परस्पराहतार्थत्वेन कल्पनैव देहाद्यात्माभिमानस्य अप्रमाणत्वादित्यत आह। प्राक्च तथाभूतात्मेति। सत्यमौपनिष
दपुरुषाधिगमेऽधिकारविरोधः कर्मासामर्थ्यात्कर्मविधयः स्वोचितं व्यवहारं अभिनिवर्तयितुं नालं प्रज्ञातेन तेन त्राव्यावि

सम रोहुं। न च परस्पराहतिः। विद्याविद्ये यावत्तुरूपभेदेन यथावस्थोपपत्तेः। यथा न हिंस्यात्सर्वा भूतानीति साध्यांसन्निरोधे पित्र्येनेनाभिचरन्य

जेतेति शास्त्रं प्रवर्त्तमानं न हिंस्यादिति अनेन न विरुध्यते तत्कस्य हेतोः। रूपभेदादिति। अववर्जितको धारातप। रुद्रपानिरोधे विधिक्रिये

तेऽको धारातिवही लताम्लकरूपेनाद्विचारवृरति। अविद्यावत्तुकपविषयत्वं नातिवर्त्तन्ते। प्रतिबुद्धौ तदेवस्योरपतीति तथाहीति।

वर्णाध्यासो राजा राजसूयेन यजेतेत्यादि। आश्रमाध्यासो गृहस्थः सदृशीं भार्यां विंदेदित्यादि। वयोध्यासः कालकेशोऽग्नीना

दधीतेत्यादि। अवस्थाध्यासो प्रतिस नाधेयवाधीनांजल्कादि एव वेदो न [illegible] प्राणत्यागादि। आदिग्रहणं पातकोपपातकसंक

रीकरणापात्रीकरणमलिनीकरणाद्यध्यासोपसंग्रहार्थं। तदेवमात्मानात्मनोः परस्पराध्यासमाक्षेपसमाधानाभ्यामुपपाद्य

प्रमाणप्रमेयप्रवर्त्तनेन च दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्रपंचेन प्रतिपादयिष्यन्तत्स्वरूपमुक्तं स्मारयति। अध्यासो ना

॥श्री॥४१॥ मातस्मिंस्तद्बुद्धिरित्यवोचाम। स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्यस्य संक्षेपाभिधानमेतत्। तत्राहमिति धर्मितादात्म्याध्या

सम्। तत्र ममेत्यनुत्यादिति धर्माध्यासं नानर्थहेतुरिति धर्माध्यासमेव ममकाररूपं सान्द्रदरोपानर्थसंसारकारणमुदाहरणप्रपंचेना ॥१३॥

हात यथा पुत्रभार्यादिष्विति। देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्रकलत्रादिस्वाम्यं कल्पितादिचारोप्याहमेव विकलः स

कल इति। स्वस्य खलु साकल्येन स्वाम्यं साकल्यात्स्वामीश्वरः। सकलः। संपूर्णो भवति। तथा स्वस्य वैकल्येन स्वाम्यवैकल्या

त्स्वामीश्वरो विकलो भवति। बाह्यधर्मा पि वैकल्यादयः। स्वाम्यपूर्णाणिक पा संचारिताः। इत्यरोपेतानात्मन्यध्यस्यतीत्यर्थः॥

यदा च परोपाध्याये देहधर्मे स्वाम्ये द्रष्टुं नास्ति तदा केवलकथा अन्तो पाधिके च देहधर्मेषु कृशत्वादिष्विति। तान् व्यपदेशानाह तथा देह

धर्मानिति। देहादयं तरंगापो [illegible] पाणां अध्यस्तात्मभावानां धर्मान्कृशत्वादीन्ततो प्यंतरंगस्यांतःकरणस्याध्यस्तात्म

४ विपर्ययेणांतःकरणाद्यचेतनं तस्य विपर्ययश्चैतन्यं तेनेत्यर्थः तत्र ह्यात्मनी पा अंतःकरणादि ४

भावस्य धर्माः कामसंकल्पादीनां तस्य धर्मस्य तीति योजना तदनेनेतरेतरधर्माध्यासमुक्त्वा तस्य इतरेतरधर्म्याध्यासमाह एवमहंप्रत्ययिनं
अहंप्रत्ययो हृदि त्रि ४ धर्मि सिनं अंतःकरणादौ सोयमहंप्रत्ययी तस्य प्रचारसाक्षिणं अंतःकरणप्रचारसाक्षिणि चेतन्यो दासीनत्ता
ध्यां प्रत्यगात्मन्यध्यस्य तदनेन कर्तृत्वभोक्तृत्वेउपपादिते चैतन्यमुपपादयति तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणांतःक
रणादिष्वध्यस्यति तदनेनांतःकरणाद्यवच्छिन्न ४ प्रत्यगात्मा इदमनिदंरूपश्चेतन ४ कर्ता भोक्ता कार्यकरणाविद्याद्वयाधारो
हंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानः तदुपादानश्चाध्यासः स्वनादित्वात् बीजांकुरवन्नेत
रेतराश्रयत्वमित्युक्तं भवति प्रमाणप्रमेयव्यवहारं दृढीकृत्य तमपि त्रिधा प्रहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतया
ध्यासं दृढीकरोति। एवमयमनादिरनंतः तत्त्वज्ञानमंतरेणाव्याकुरसमुच्छेद ४ अनाद्यनंतत्वे हेतुरुक्तो नैसर्गिक इति। मिथ्याप्र
त्ययरूप ४ मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वं तद्यस्य स तथोक्त ४ अनिर्वचनीयप्रत्ययश्च शक्तलुपसंहरति। अस्यानर्थहेतोः
प्रहाणाय विरोधिप्रत्ययं विना कुतोस्य प्रहाणमित्यत आह उक्तं मालोक विद्याप्रतिपत्तये इति प्रतिपत्तिः साक्षात्कारस्तेनन्तु
ज एवमाचार्यनादिकर्मसु प्रवृत्तये आलोकत्वं विगलितनिखिलप्रपंचत्वं आनंदरूपस्य सतस्तदात्मप्रति निर्विचिकित्साभावर्य
तो वेदांता ४ समूलकत्वात्मध्यासमुपघ्नंति। एतदुक्तं भवति। अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वात्
नि ४ प्रयोजनत्वात् च न जिज्ञासा स्यात् तदभावेन च ब्रह्मज्ञानाय वेदांता: प्रवर्तेरन् अपि तु विवक्षितार्थोपमाने प्रयुज्येरन् नाम हि
तदोपनिषदात्मप्रत्यय ४ प्रमाणतामश्नुते न चासौ वेदप्रमाणां अभ्यक्तो पिवास्तवकर्तृत्वभोक्तृत्वादात्मनो पनेतुमर्हति। आरो
पितं हि तत्त्वज्ञानेनापोद्यते न तु वास्तवमतत्त्वज्ञानेन न हि रज्ज्वा रज्जुत्वं सहस्रमपि सर्पधारावाहिकप्रत्ययापादयितुमुत्सहंते

